# Shri Brahmanyatirtha Pancharatnamalika Stotram

# श्रीब्रह्मण्यतीर्थपञ्चरत्नमालिकास्तोत्रम्

## Document Information

Text title : Shri Brahmanyatirtha Pancharatnamalika Stotram

File name : brahmaNyatIrthapancharatnamAlikAstotram.itx

Category : deities_misc, gurudev, pancharatna

Location : doc_deities_misc

Author : vyAsarAja

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Description/comments : PanchayatistutiH

Acknowledge-Permission: C Narayanarao

Latest update : June 15, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 15, 2020

*sanskritdocuments.org*

Shri Brahmanyatirtha Pancharatnamalika Stotram

# श्रीब्रह्मण्यतीर्थपञ्चरत्नमालिकास्तोत्रम्

वन्दे ब्रह्मण्यतीर्थं शुभतमचरितं सेवितश्रीसमेतम्
शान्तं दान्तं महान्तं गुरुगुणभरितं योगिसङ्घैरुपेतम् ।
कामक्रोधाद्यतीतं कुमतिभिरजितं कल्मषाम्भोधिपोतम्
धीरं भूदेवगीतं शुभजनमहितं धन्यमानं विनीतम् ॥ १॥

माद्यन्मायिगजेन्द्रपञ्चवदनः प्रख्यातकीर्तिर्महान्
श्रीमद्विठ्ठलपादपद्ममधुपः सर्वेष्टचिन्तामणिः ।
निर्व्याजोरुदयाकटाक्षलसितो ज्ञानादिभाग्योज्वलः
श्रीब्रह्मण्ययतीन्द्र मस्तकमणिः पायादपायात्स माम् ॥ २॥

भिभ्रत्काषायचेलं विलसिततुलसीपङ्कजाक्षादिमालम्
धूताज्ञानाघजालं मृदुवचनकलं चारुसौन्दर्यशीलम् ।
आर्तत्राणैकलोलं प्रणतमुनिकुलं वैष्णवाग्र्यानुकूलम्
ब्रह्मण्यार्यं दयालुं स्मितमुखकमलं तं भजेलम् ॥ ३॥

यद्बृन्दावनदर्शनेन नितरां पापानि यान्ति क्षयम्
यद्बृन्दावनमृत्तिका सुविधृता तापत्र यध्वंसिनी ।
यद्बृन्दावनसेवया भुवि जनः प्राप्नोति विद्यां सुखम्
सर्वारिष्टनिवृत्तयेस्तु स च मे ब्रह्मण्यतीर्थो गुरुः ॥ ४॥

कुष्ठश्वेतोरुगुल्म क्षयकठिणतरव्याधिवैद्याधिनाथो
भूतप्रेतग्रहोच्चाटनकुशलमहामन्त्र मूर्तिर्मुनीन्द्रः ।
सर्वाभीष्टप्रदाता सरससुहृदयःपुण्यचारित्रनामा
भूयाद्ब्रह्मण्यतीर्थो गुरुकुलतिलको भूयसे श्रेयसे मे ॥ ५॥

इति श्रीमद्व्यासराजविरचितं
श्रीब्रह्मण्यतीर्थ पञ्चरत्नमालिकास्तोत्रं सम्पूर्णम् ।

Encoded and proofread by Krishnananda Achar

*Shri Brahmanyatirtha Pancharatnamalika Stotram*

pdf was typeset on June 15, 2020

Please send corrections to *sanskrit@cheerful.com*